MSS No. 127 Subject Religion

Name of MSS व्युत्पत्तिवाद (Vyutpattivāda)

Author

Period Not available Folios 6 (001, 002 + 004 to 008)

Script Sanskrit Source Prithipal Singh

Missing Folios 003

शु० १

ॐ शाब्दबोधे एकपदार्थेऽपरपदार्थस्य संबंधः संसर्गमर्यादया भासत इति व्युत्पत्तिवादे शाब्दिकग्रंथः । १
अत्रेदं चिंत्यते लोके तावद्ग्रंथकर्तृभिः सर्वैर्ग्रंथारंभस्तु परमतनिरसनपरः स्वमतस्थापनपरो वा ग्रंथ
मतो ग्रंथश्चारभ्यते तत्सर्वज्ञैस्तार्किकशिरोमणिभिर्गदाधरभट्टाचार्यैः प्रथमतः प्रणीयमानः शाब्द
बोधे एकपदार्थेऽपरपदार्थस्य संबंधः संसर्गमर्यादया भासत इति ग्रंथोपि परमतनिरसनपरः स्वमतव्यव
स्थितिपरो वा नेयः न चैतदुपपद्यते तथाहि तत्र शाब्दबोधे एकपदार्थेऽपरपदार्थस्य संबंधः प्रकारतया भास
ते इति मीमांसकादिमते तन्मतनिरासार्थं मया ग्रंथः प्रक्रांत इति चेत्स्यादेवं यदि मीमांसकानां तथा मतं स्या
देव न तन्मतेपि संबंधस्य संसर्गतयैव भानस्वीकारात् तत एव शक्तिवादे अन्वितमतोपन्यासावसरे तदीयमते तत्त
द्विषयकशाब्दबोधं प्रति तद्विषयकपदजन्यपदार्थोपस्थितेर्हेतुत्वमिति कार्यकारणभावेपि विषयतायां सं
सर्गताभिन्नत्वनिवेशमात्रेणैव गौरवमाविष्कृतम् अत एव च जातिशक्तिविचारे संसर्गघटकतया व्यक्तिभा
नेपि कर्मत्वांशे व्यक्तिप्रकारतया शक्तिपत्यर्थमाहेत्यादर इत्युक्तमत एवास्य ग्रंथस्य स्वमतव्यवस्थापनप
रत्वमपि न युज्यते तादृशान्यविधमताप्रसिद्धेरिति न च स्वमते वस्तुस्थितिप्रदर्शनपरोयमिति वाच्यम् ।
संसर्गतयैवेत्येवकाराभावेन क्वचित्प्रकारतयापि भासत इत्यपि वक्तुमशक्यते यथा प्रकारतया न भासते इ ।
तिप्यवच्छेदासंभवेनोदहरत्वापत्तेश्चेति अत्रोच्यते मीमांसकमतनिरासार्थमेवायं ग्रंथः प्रवर्तते तन्मते
ह्यर्थाध्याहारेण द्वारमित्याद्येकपदस्थले शाब्दबुद्धिरंगीक्रियते तन्निरासार्थमेकपदार्थेऽपरपदार्थ
संबंध इत्युक्तं तथा च एकपदार्थ एवापरपदार्थसंबंधः संसर्गमर्यादया भासते न तु अपरपदार्थ इति ।

मित्येकार्थकारणाभावात्किंचिद्धर्मप्रकारेणानुपस्थितसंबंधांशेपदजन्योपस्थितेरभावेपिनक्षतिरतोनान्वये
वु॰ विभक्तिरितिभावइतितादृशमतनिरासइत्याहुः वस्तुतस्तु स्वरूपेण प्रकारेणक्वचिदभेदः संबंधतयाभासतेक्वा
२ चिदाधाराधेयभावादिसंबंधतयाभासतइत्यादिमर्यादयाविव्यवस्थिते तत्रप्रथमतः क्वचित्संबंधः संसर्गतयाभासतइ
त्यत्रकिंमानमित्याशंकायांप्रमाणोपन्यासार्थमयंप्रारम्भः शाब्दबोधेएकपदार्थेऽपरपदार्थसंबंधः संसर्गतया
भासतइति तथाच सोमः सर्वजनानांशाब्दबोधेएकपदार्थेऽपरपदार्थसंबंधस्संसर्गमर्यादयाभासतेसोपा
मन्नुभवसंबंधः क्वचिदभेदः क्वचित्तदतिरिक्तएवेतिपर्यवसितार्थ इति ननु किंचिदनुपपन्नम् विशेष्यवाचका
पदोत्तरविभक्तीत्यादि पुरूरवो माद्रवसोविश्वेदेवा इत्यादाविति नन्वत्रद्वित्वप्रकारेणभासमानयोर्द्वित्वता वि
शेषणयोर्बहुत्वस्यबाधितत्वेनदारा इत्यत्रेवविश्वेदेवा इत्यत्रापिविभक्तेः साधुत्वमात्रार्थकतयासंख्या
तात्पर्यकत्वाभावाद्विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्यायाअप्रसिद्धेः कथं विशेष्यवि
शेषणपदयोर्भिन्नवचनकत्वोपपत्तिरेवमेवैकोघट इत्यादावेकपदेनैवैकत्वप्रतिपादनान्नघटपदो
त्तरैकवचनस्यैकार्थकत्वमितिसिद्धान्तात् तत्रघटपदोत्तरविभक्तेरेकत्वतात्पर्यकत्वाभावेनविशेष्यवा
चकपदोत्तरविभक्तितात्पर्यविषयसंख्यायाअप्रसिद्धत्वाद्विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषय
संख्यायाअविवक्षितत्वेयत्रतत्रसमानवचनकत्वमितिनियमाप्रसरान्नतत्रसमानवचनकत्वानुपपत्ति
रिति यदि च विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयेत्यस्यविशेष्यवाचकपदोत्तरविभक्तिसजातीयवि २
भक्तितात्पर्यविषयेत्यर्थस्तथाचविश्वेदेवा इत्यत्रविभक्तेः संख्यातात्पर्यकत्वाभावेपितत्सजातीयघटाः

तेन्निराकृति न चैतदेव कथं लभ्यते एकपदार्थ एवेत्येवकाराभावादिति वाच्यं उद्देश्यविधेयबलेन तल्लाभात् ननु तत्र
कथमुद्देश्यविधेयभावः न च शाब्दबुद्धित्वावच्छेदेनैकपदार्थानुयोगिकापरपदार्थप्रतियोगिकसंबंधनिरूपसं
सर्गिकविषयताशालित्वं विधेयमिति वाच्यं शाब्दबुद्धित्वस्य वह्निना सिंचतीत्याद्ययोग्यवाक्यजन्यभ्रमसाधार
णत्वेन तद्वृत्त्येकपदार्थानुयोगिकापरपदार्थप्रतियोगिकसंबंधावगाहित्वस्य शाब्दत्वव्यापकत्वाभावेन शा
ब्दत्वावच्छेदेन तस्य विधेयत्वासंभवात् नाप्येकपदार्थानुयोगिकापरपदार्थप्रतियोगिकसंबंधत्वावच्छेदेन शा
ब्दबोधीयसंसर्गताश्रयत्वं विधेयं तत्रैव वह्निना सिंचतीत्यादिवाक्यजन्यभ्रमे वह्निसेकयोः संबंधतया कारणत्वस्य
भानेनास्यांशस्यातत्परत्वासंभवेन निर्विकल्पशाब्दबोधसंग्राहकत्वानुपपत्तेरिति चेदुच्यते शाब्दबोधत्वावच्छे
देन एकपदार्थनिष्ठविशेष्यतानिरूपितापरपदार्थनिष्ठप्रकारतानिरूपितसंसर्गत्वाभिन्नविषयत्वस्यैव
ष विधेयत्वान्न काचिदनुपपत्तिरिति एवं च ह्रदमित्यादौ पदानुसंधानं विनापि शाब्दबोधांगीकारे शाब्दसिद्धित्वा
वच्छेदेन निरुक्तविधेयस्य बाध इति तादृशमीमांसकमतनिरास इति केचित्त्वनेनान्वितशक्तिवादिमतमनेन निर
स्यते तथाहि ननु घटमानयेत्यादौ घटादीनामुपस्थापकपदसत्त्वाच्छाब्दबोधे मानं युज्यते न तु संबंधस्य
पदानुपस्थितत्वात् तद्विषयकशाब्दं प्रति तद्विषयकपदजन्योपस्थितेर्हेतुत्वात् ततोऽन्वयांशेपि शक्तिरंगीका
र्येति मीमांसकस्याशंकयावतीर्णोयं ग्रन्थः तदर्थश्च शाब्दबोधे एकपदार्थेऽपरपदार्थस्य संसर्गः संसर्गमर्याद
या भासते न तु प्रकारतया विशेष्यतया वेति तथा च यत्र घटादिपदात्तात्पर्येण घटत्वादेरुपस्थितिस्तत्र घटत्व
प्रकारेण घटादेः शाब्दबोधवारणाय तद्धर्मप्रकारकशाब्दबुद्धिं प्रति तद्धर्मप्रकारकपदजन्योपस्थितेः कारणत्व

तदर्थत्वे विशेष्यवाचकपदतात्पर्य्यविषयीभूतसंख्यैवेत्येवं सामंजस्येनाधिकांशावैयर्थ्यापत्तेश्च न च विभक्तेः
श॰ संख्यार्थकत्वकल्पसंग्रहायैव तदादरइति वाच्यं तत्र संख्याविशिष्टतत्तत्प्रकृत्यर्थबोधं प्रति तत्तद्विभक्त्ये
४ ततत्प्रकृतिपदस्य हेतुत्वेनोक्तरीत्या तावतैवोभयपक्षसंग्रहात् किं चोभयपक्षसंग्रहोपि दुःशक एव
तथाहि विभक्तेः सार्थकत्वमते यत्र विभक्तेः स्वारसिकलक्षणया एकत्वसंख्यातात्पर्येण वेदाः प्रमाणा
नीति प्रयोगस्तत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयीभूतसंख्याविरुद्धसंख्याया विवक्षितत्वा
त्समानवचनतानस्यादिति ताहृशसंख्याविरुद्धसंख्याविशेषणपदोत्तरविभक्त्या शक्त्या निरूढलक्षणया
वाऽविवक्षितत्वे यत्र तत्र समानवचनकत्वमिति ताहृशानियमार्थ ऊहनीयः तत्र विशेषणवाचकपदोत्त
गा रविभक्त्येत्यनुपादाने प्रत्यक्षमनुमानमुपमानं शाब्दं चैते प्रमाणानीत्यत्र विशेष्यवाचकपदोत्तरविभ
क्तितात्पर्य्यविषयसंख्याविरुद्धैकत्वसंख्यायाः प्रत्यक्षादिपदोत्तरविभक्त्याविवक्षितत्वात्समानवचनता
नस्यात्तत्तदुपादानमावश्यकम् इत्थं च संख्यानिरर्थकत्वपक्षाद्युः संग्रहएव तत्र वेदाः प्रमाणमित्यादौ प्रमा
णपदोत्तरविभक्त्या शक्त्या लक्षणया वा संख्यायाएवलक्षणासंभवात् तत्र विशेषणवाचकपदेनेत्युक्तौ विभक्तेः
संख्यार्थकत्वपक्षासंग्रह इति तु दिलसुरतन्यायो तुल्यत्वेति न किंचिदेतत् विशेषणवाचकपदोत्तरविभक्तितात्
पर्यविषयसंख्याविरुद्धसंख्यायाइत्युक्तौ उक्तस्थले पुरूरवोमाद्रवः पदोत्तरविभक्तितात्पर्य्यविषयत्वद्वित्व
संख्याविरुद्धसंख्यायाविश्वेदेवपदोत्तरविभक्त्याविवक्षितत्वाभावाद्विन्नवचनकत्वानुपपत्तिरिति तद्व्युदासेतम् ४

मेरुमंदरमहीध्रमंथमथनपरिक्षुभितपयःपयोनिधिसमुल्लसत्कल्लोलमालावलेपलोपकरणनिपुण
वाणीधोरणीधुरीणगदाधरोयेतुस्माद्द्योक्ता एवंतादृशनियमार्थे इतिनकिंचिदनुपपन्नम् एतेनशाब्दे
न्युक्तौविभक्तेर्नसंख्यावाचकत्वंकिंतुप्रकृतेरेवेतिकस्यचित्पक्षस्यखंडनमग्रेप्रदर्शयिष्यमाणत्वात्त
त्पक्षासंग्रहस्तन्मतेवेदाःप्रमाणमित्यादौविशेष्यवाचकपदोत्तरविभक्तिप्राक्संख्याप्रसिद्धेरतस्त
त्पक्षस्यापिसंग्रहायतात्पर्यविषयीभूतेत्युक्तम् एवंचविभक्तेःसंख्यार्थकत्वाभावेपितन्नद्विभक्त्यंत
पदस्यैवतत्तत्संख्यावभिन्नार्थवाचकत्वाद्बहुवचनांतवेदपदंबहुसंख्यावच्छिन्नवेदबोधकंभवतित्याका
रकतात्पर्यविषयत्वंवेदपदोत्तरविभक्तेरपिसंभवतीतिविशेष्यवाचकपदोत्तरविभक्तितात्पर्यविष
यीभूतसंख्यायाःप्रसिद्धिसंभवान्नानुपपत्तिरित्याशयवर्णनेपरास्तम् उक्तानुपपत्तिवारणायत
स्यशाब्दत्वार्थकत्वपर्यवसानस्यावश्यकत्वान्नचैवंतत्पक्षस्यासंग्रह इतिवाच्यं तथासत्यपिपक्षा
विरहेणतत्संग्रहस्यग्रंथकाराभिप्रेतत्वान्न चैवंतत्कल्पेवेदाःप्रमाणमित्यादौकथंभिन्नवचनका
त्वोपपत्तिरितिवाच्यंमन्नयेवदिशाविभक्तेर्निरर्थकत्वपक्षेपिविशेष्यवाचकपदतात्पर्यविषयीभूत
संख्याविरुद्धेत्येवंनियमस्यकल्पनीयत्वान्नह्येकोक्त्या सर्वकल्पेषुपरिहारानुक्तौग्रंथकारस्यन्यू
नताएकत्रप्रदर्शितदिशासर्वकल्पेपिपरिहारस्यावलोकनीयइतितत्संग्रहायतात्पर्यविषयेत्येव

व्यु० ५

भवतीति एकपशुकरणकयागसाधनीभूतपशुनिष्ठैकत्वमपि यागकरणकरणत्वरूपं स्वसमभिव्याहृतपदा
र्थसंसर्गित्वविशिष्टपशुरूपप्रकृत्यर्थतावच्छेदकरूपेण सजातीयकालांतरीयपुरुषांतरीयसाधनीभूतपशुनि
ष्ठभेदप्रतियोगितावच्छेदकमेव भवतीति तादृशैकत्वाप्रसिद्धादिति अत एव वाक्यार्थानुपपत्तिरिति चेदुच्यते ।
स्वसमभिव्याहृतपदार्थेत्यस्य स्वान्वितस्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टेत्यर्थात् स्वपदेनैकपशुव्यक्ति
साधारणं तदन्वितस्तद्वाचकपदसमभिव्याहृतपदार्थसंसर्गित्वं अत एव करणकएवयागो भवति न तु कालांतरी ।
यादिरिति तत्संसर्गित्वस्य पशुंतरासाधारणत्वान्न निष्ठैकत्वमेव तादृशमिति दोषानवकाशादिति ननु कालां ।
तरीयैतदात्मतो तावच्छेदा: प्रमाणे संपन्नो व्रीहि: एतदृशो वृद्धघटप्रत्यक्षान्यामत्र घटो स्तीत्यादिवाक्यानां जात्येक ।
त्वपरत्वेन समर्थने व्रीहित्वादिगतैकीदृशमेकत्वं विशेषणपदेतरविभक्त्या प्रतिपाद्यते न च केवलमेकत्वमपेक्षा
बुद्धिविशेषविषयत्वरूपं तत्र तादृशविभक्त्या प्रतिपाद्यते इति वाच्यं वस्तुमात्रसाधारण्याद्व्यावर्तकत्वाच्चैत्याद्युक्तरूपैक्या
तस्यैकवचनार्थत्वस्य स्वयमेव निराकृतत्वात् न चात्रापि स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छे
दकरूपेण स्वसजातीयभेदनिष्ठप्रतियोगितानवच्छेदकैकत्वमेव भासत इति वाच्यं तादृशपदार्थसंसर्गित्वस्य प्रकृ
त्यर्थतावच्छेदकस्य च व्रीहित्वाद्यवृत्तितया स्वपदेन तत्र व्रीहित्वाद्युपादानासंभवादिति चेन्मैवं जात्येकवचनस्थ
ले एकवचनेन शक्त्यंतरेण लक्षणया वा स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थनिष्ठभेदप्रतियोगि
तानवच्छेदकत्वरूपैकत्वस्य व्रीहित्वादौ प्रतिपादनेनानुपपत्त्यभावात् नीलघटरूपमित्यादिवाक्यसाधार ।
ण्यानुरोधेनेति ननु तत्र नीलघटे रूपं नीलघटरूपमित्यादि सप्तमीतत्पुरुषस्थले घटादिपदस्य घटाधिकरण ५

अत्रेदं चिंत्यते यद्येतादृशान्नियमसमवलेख्य वेदाः प्रमाणमित्यादौ भिन्नवचनकत्वसमर्थनेनेदाणकघटेबहुगुणतास्य
घ्राणग्राह्यगुणवंतस्स्यादिप्रयोगापत्तिस्तत्रापि घटपटपदेतरविभक्त्यैकदेशत्वसंख्याविरुद्धबहुत्वसंख्याया
गुणपदेतरविभक्त्याविवक्षितत्वेन तादृशान्नियमस्य लगनततयाभिन्नवचनकत्वोपपत्तेरथ विशेष्यवाचकपदेतर
विभक्त्यासंख्याविरुद्धतादृशसंख्याव्याप्यसंख्याया अविवक्षितत्वं यत्रतत्र समानवचनकत्वमिति तदर्थोदुक्तस्थले
तादृशसंख्यायाः अविवक्षितत्वात्समानवचनकत्वमेव साधु नन्विभिन्नवचनकत्वमिति न तादृशप्रयोगापत्तिरिति
चेत्तथापि घटा रूपवन्तो घटाद्रव्यत्ववान् घटपटाद्रव्यत्ववान् घटाद्रव्यत्वपृथिवीत्ववंतोऽस्यादिप्रयोगापत्तिर्दु-
वीरैव नच विरुद्धसंख्याविवक्षावनाधुनिकीनाह्या अपितु प्राचीनानां विवक्षा तथा वेदाः प्रमाणमित्यादिप्रयो-
गणवत्तथाविधविवक्षेतिनाएवं घटागुणवन्तःस्यादिप्रयोगापत्तिरिति वाच्यं प्राचीनविवक्षाया विवक्षणाभ्यामेव
तथाविधप्रयोगाप्रयोगोपपत्तौ निरूढनियमानुसरणप्रयासवैयर्थ्यान्न तत्रापि प्राचीनोक्तिविरोधविवक्षोक्तिविरुद्धविवक्षा-
कृतइति बीजस्य प्रष्टव्यत्वात्तथासति जलत्वद्रव्यत्वगुणत्वतात्पर्येण घटपटयोर्द्वे रूपरसादयो गुणास्त्याधुनि-
तद्बलेन साधुत्वासाधुत्वयोर्व्यवस्थापनीयत्वात्तत एव ग्रंथकृता तथाविधान्येव स्थलान्युदाहृतानि मत्कृतेव सर्वमया-
नियतलिंगकस्थलमेवेति न दोषावकाशः नियतलिंगकत्वं च स्वप्रतिपाद्यार्थविशेष्यवाचकपदानधीनलिंगक-
त्वं न त्वेकमात्रलिंगकत्वं तथासति पाचकमात्रस्य नियतलिंगत्वापत्तेः पाचकः पाचिका पाचकमित्यादौ पाचकादिपदा-
नां विशेष्यलिंगवशेन लिंगत्रयसंभवेऽपि तत्र लिंगकवत्त्वस्य दानोभिन्नाभिन्नत्वेन कस्यापि शब्दस्य लिंगद्वयव- त्ते
त्वाप्रसिद्धेरित्यलं पल्लवितेन न तादृशाप्रसिद्धिरिति नन्वत्रैकपशुकरणकयागस्थलेऽपि तादृशाकत्वाप्रसिद्धिरिति
पशुनायजेतेत्यत्र तत्त्वैकपशुपदार्थः स्वसमानि [illegible] द्वयं यजिधातुपदं तदर्थः पुरुषान्तरीययागः कालान्तरीययागाक्ष

बु॰
६

त्वादिति चेन्न तृतीयया ऽभेदबोधने तृतीयांतविशेष्यवाचकपदसमभिव्याहारस्य प्रयोजकत्वमित्यन्यत्राधिक
त्वनीयत्वात् न चैवं सति धान्येन धनवानित्यादौ कथं तृतीयया ऽभेदबोधनं तृतीयांतविशेष्यवाचकपदस
मभिव्याहारस्यापि प्रयोजकत्वकल्पनात् अत्रैवं धान्येन धनवानितिवद्धनेन धान्यवानिति प्रयोगापत्तिस्तत्रा
पि मत्वर्थीयप्रत्ययांतविशेष्यवाचकपदसमभिव्याहाररूपप्रयोजकसद्भावात् न चेष्टापत्तिः रामेण पुत्र
वान् दशरथ इतिवत् पुत्रेण रामवान् दशरथः लक्ष्मणेन भ्रातृमान् राम इतिवद्भ्रात्रा लक्ष्मणवान् राम इत्यादि
प्रयोगापत्तेरिति चेन्नैवं मत्वर्थीयप्रत्ययप्रकृत्यर्थे यत्र तृतीयया ऽभेदो बोध्यते तत्र तृतीयाप्रकृत्यर्थ
तावच्छेदकव्यापकधर्मावच्छिन्नविशेष्यवाचकपदसमभिव्याहारस्य प्रयोजकत्वाभ्युपगमात् धान्य
त्वरामत्वलक्ष्मणत्वादीनां तृतीयाप्रकृत्यर्थतावच्छेदकधनत्वपुत्रत्वभ्रातृत्वादिव्यापकत्वाभावान्ना
तिप्रसंग इति ननु कथं तर्हि सुप्रज्ञाः प्रज्ञया सन्नित्यादिप्रयोगस्तत्र शोभनप्रज्ञात्वादीनां प्रज्ञात्वव्याप
कत्वाभावादिति न च तत्र बहुव्रीहिसमासत्वेन तृतीयया मत्वर्थीयप्रत्ययप्रकृत्यर्थाभेदाबोधनात्तादृशा
स्थल एव तादृशसमभिव्याहारस्य प्रयोजकत्वमिति न दोष इति वाच्यं बहुव्रीहिस्थले तादृशसमभिव्याहार
स्य प्रयोजकत्वानंगीकारे धान्येन सधनः रामेण सपुत्रो दशरथ इतिवद्धनेन सधान्यः पुत्रेण सराम इत्यादि
प्रयोगापत्तेः तस्मात्तृतीयांतविशेष्यवाचकपदसमभिव्याहारा उक्तस्थले यत्र तत्र तृतीयया ऽभेदो बोध्य
ते तत्र सर्वत्र तादृशसमभिव्याहारस्य प्रयोजकत्वं वाच्यं तथा चोक्तप्रयोगानापत्तिका वेति चेन्न तृतीयया ऽ ६

कारौ लक्षणायाः स्वीकर्तव्यतया तत्र नीलपदस्य नीलार्थकत्वे एकदेशान्वयापत्त्या घटपदस्यैव नीलाभिन्नघटा
धिकरणके लक्षणा वाच्या ऽस्यैव तत्र नीलघटपदार्थयोरभेदान्वयबोध एव नास्तीति कथं भट्टाचार्येण नी
लघटरूपमित्यादिवाक्यसाधारण्यानुरोधेनेत्याद्युक्तमिति न च तत्रापि घटपदार्थतया नीलघटयोर ऽ
भेदान्वयबोधो भवत्येवेति वाच्यं तत्र नीलघटबोधतात्पर्येण स्वारसिकलक्षणायाश्च क्लृप्तो घट इति प्रयोग ऽ
स्तत्रापि नीलघटयोरभेदान्वयबुद्ध्युत्पत्त्या स्वोत्तरसुपदभिन्नाघटानुत्तरत्वविशिष्टस्योत्तरत्वरूपाव्य ऽ
वहितोत्तरत्वसंबंधेन नीलपदवत्सुबंतघटपदत्वरूपाकांक्षाविरहान् व्यभिचारवारणाय नीलपदार्थनील
निष्ठप्रकारतानिरूपितभेदनिष्ठविषयताऽनिरूपितघटनिष्ठविशेष्यताशालिशाब्दत्वस्यैव तादृशज्ञानका ऽऽकांक्षा
र्यतावच्छेदकतावश्यकतया नीलघटरूपमित्यादौ तादृशाकार्यतावच्छेदकावच्छिन्नानुत्पत्त्या नीलघटाभे
दान्वयबुद्ध्यप्रसक्तेः किंतु साधारण्यमनुरोधेन नापि तादृशाकांक्षायाऽनभ्युपगंतव्यतया भट्टाचार्यग्रंथ
विरोधस्य दुर्वारत्वादिति चेन्न तादृशग्रंथस्य नीलघटद्रव्यमित्यादिग्रंथोपलक्षणपरत्वादेतत्सूचनायै
व नीलघटरूपमित्यादिवाक्ये इत्यादिपदप्रयोगात् भवति च नीलघटद्रव्यमित्यादौ तादृशाकार्यतावच्छेदका
वच्छिन्ना नीलघटाभेदान्वयधीरिति विरोधगंधानवकाशात् द्वितीयादिना भेदबोधने द्वितीयांतविशे ऽ
ष्यवाचकपदसमभिव्याहारस्य प्रयोजकत्वाभ्युपगमादिति ननु तथापि नीलो न घट इत्यादौ नीलघटा ऽ
भेदान्वयबोधापत्तिः द्वितीयया ऽभेदबोधने एव द्वितीयांतविशेष्यवाचकपदसमभिव्याहारस्य प्रयोजक ऽ

मु० ८ संबंधावच्छिन्नप्रतियोगिताकनीलाभाववान्घटः प्रमेय इत्यादिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षप्रति
बंधकतावच्छेदकसामग्र्याः प्रतिबंधकताधिक्येन गौरवं संसर्गतामते तु तादृशसामग्र्याः स्वाभेदसंबंधाव
च्छिन्नप्रतियोगिताकनीलाद्यभाववान्घट इत्यादिनिश्चयाभावघटितत्वे तथात्वे तत्कारणविरहादेवता
दृशप्रत्यक्षोत्पत्तिवारणसंभवादितिवाच्यं तथाप्यस्तुमन्मते एतादृशप्रतिबंधकताकल्पनस्य प्रवक्ष
ते पूर्वोक्तयोर्द्वयोरेकतरप्रतिबंधकताकल्पनेन साम्यं द्वितीयेत्वाधिक्यमिति गौरवानपायात् न च प्रकार
तामते घटप्रत्यक्षादिकं प्रति तादृशप्रतिबंधकतायां विभक्तिजन्याभेदोपस्थितिनिवेशेन नीलाभेदाभाव
वान्घट इत्यादिबाधाभावनिवेशेन वा गौरवं संसर्गतामते तादृशोपस्थितिबाधाभावादीनां तथाविधवा
क्यजन्यशाब्दं प्रत्यहेतुतया तादृशवाक्यज्ञानघटितसामग्रीप्रतिबंधकतायां तेषामनिवेशादितिवाच्यं ^
भवन्मतेपि स्वाभेदसंबंधावच्छिन्ननीलाद्यभावव्याप्यनीलाभेदाभाववान्घट इत्यादिनिश्चयस्य तद्भाव
व्याप्यवत्तानिश्चयविधया तादृशवाक्यजन्यशाब्दविरोधितया तादृशनिश्चयाभावस्य तथाविधशाब्दसाम
ग्रीप्रतिबंधकतायां निवेशस्याधिक्येन लाघवानवकाशात् एतत्सर्वमभिप्रेत्यैवाग्रे नीलो घट इत्यादौ विशे
षणविभक्तेरभेदार्थकत्वपक्षेपि यद्यप्युक्तयुक्त्यरीत्या लाघवं संभवति तथापि तत्र नानाविद्वेष इति ग्र
न्थेन महार्थः प्रभेदस्य प्रकारतामते निर्भरमसूचयत् स्वस्मादेवावलोकने संसर्गतामत एव गौरवं ^
दृश्यते न च राजपुरुष इत्यादौ स्वत्वस्य प्रकारतासंसर्गतावेति विचारे प्रदर्शयिष्यते स्वार्थबोधोपयुक्ता

भेदबोधने तृतीयाप्रकृत्यर्थतावच्छेदकव्यापककिंचिद्विशेषिततादृशतृतीयाप्रकृत्यर्थतावच्छेदकान्यतरा-
धर्मावच्छिन्नविशेष्यवाचकपदसमभिव्याहारस्य प्रयोजकत्वांगीकारान्नुमन्नाऽइत्यादावदोषात् यद्वा तृती-
ययाऽभेदप्रतिपादने किंचिद्धर्मविशेषिततृतीयाप्रकृत्यर्थतावच्छेदकावच्छिन्नविशेष्यवाचकपदसमभि-
व्याहारस्यापि पृथक्प्रयोजकत्वकल्पने इति न दोषः अत्र प्रयोजकानां स्वाव्यवहितोत्तरत्वनिवेशान्नापरा-
स्य व्यभिचारः मृदुतया वह्निमधुतया वह्नी इत्यादिविशेषणे तृतीयेति शेषः इति इदं तु [redacted] तत्त्वमित्यास्म
उक्तस्थले तत्संसर्गकबोधस्यैवोपगमादित्येतदग्रमग्रे स्फेनाभेदस्य प्रकारतामते वृत्तिकल्पनाधिक्या-
त्संसर्गतापक्ष एव साधीयानलाघवादिति समर्थितं भवति भट्टाचार्यैस्तु तत्र युक्तिं सहते संसर्गतामत एव
गौरवाधिक्यान्न्याहि संसर्गतामते नीलो घट इत्यादिसमभिव्याहारज्ञानघटितयादृशसामग्रीकाले नी-
लाभाववानभेदः प्रमेयः नीलाभेदाभाववान्घटः प्रमेय इत्यादिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षवारणा-
य तत्र तत्र तादृशसामग्र्याः तादृशप्रत्यक्षं प्रति प्रतिबंधकताद्वयकल्पने महागौरवात्प्रकारतामतेऽभे-
दे वृत्तिकल्पनमकिंचित्करं तन्मते तु तादृशसमभिव्याहारज्ञानघटितसामग्र्याः नीलाभाववानभेदः प्रमेय
भाववान्घट इत्यादिबाधाभावघटिततया तादृशसामग्रीसत्त्वे नीलाभाववानभेदः प्रमेदाभाववान्घटः
इत्यादिविशेष्यतावच्छेदकप्रकारकनिर्णयरूपकारणविरहादेव तथाविधविशिष्टवैशिष्ट्यावगाहिप्रत्य-
3 क्षोत्पत्त्यसंभवात्तत्र तादृशसामग्र्याः प्रतिबंधकत्वं न कल्प्यत एवेति नवाभेदस्य प्रकारतामतेप्यभेदा